# दीपशिखा

(संस्कृताध्ययनविभागस्य ई-पत्रिका)

प्रथमः अङ्कः



रामकृष्णमिशन्-विवेकानन्दविश्वविद्यालयः
बेलुरमठः, हावडा, पश्चिमवङ्गाः ७११२०२

# दीपशिखा

(रामकृष्णमिशन्-विवेकानन्दविश्वविद्यालयस्य संस्कृताध्ययनविभागस्य ई-पत्रिका)

## प्रथमः अङ्कः


उपदेष्टा

स्वामी आत्मप्रियानन्दः

सम्पादकः

राकेशदाशः

सम्पादनसहायकाः

सुमन्तचौधुरी

अमितकुमारदे

श्रीमन्तभद्रः

नित्यानन्दमान्ना

# सूची



| क्रमः | प्रबन्धः (पठितुं नुदतु) | लेखकः | पुटसङ्ख्या |
|---|---|---|---|
| १. | सम्पादकीयम् | | १ |
| २. | ब्राह्मी वेदयताद्ब्रह्म विद्यां प्रददती पराम् | ड. हरेकृष्णपट्टजोशी | २ |
| ३. | सरस्वतीपरिचयः | विद्वान् ड. वेङ्कटरमणभट्टः | ४ |
| ४. | रामकृष्णमिशन्-विवेकानन्दविश्वविद्यालये सरस्वतीपूजा | विष्णुपदपालः | ६ |
| ५. | कालिदासवर्णितवियोगे मानवेतराणां सहानुभूतिः | कृष्णगोपालपात्रः | ८ |
| ६. | अद्वैतशास्त्रपरिचयः | अमितकुमारदे | १० |
| ७. | मीमांसाशास्त्रपरिचयः | श्रीमन्तभद्रः | १२ |

# सञ्चारिणी दीपशिखा

रामकृष्णमिशन्-विवेकानन्दविश्वविद्यालयस्य संस्कृताध्ययनविभागः यथा शास्त्राणाम् अध्ययनाध्यापनयोः बद्धादरः तथैव संस्कृतभाषायाः शास्त्राणां च प्रचारप्रसारयोः। मासेभ्यः प्राक् पूज्यैः कुलपतिभिः अयम् उपदेशः कृतो यत् सामान्यजनेषु संस्कृतभाषायाः शास्त्राणां च प्रचाराय संस्कृताध्ययनविभागेन कश्चन उपक्रमः कर्तव्यः।

सम्प्रति विभागेन काचन वार्षिकी शोधपत्रिका प्रकाश्यमाना वर्तते। सा पत्रिका विदुषां मुदावहा अपि सामान्यानां दुरवगाहा इति अन्या सामान्यजनप्रसिद्धा पत्रिका कर्तव्या। सा च समग्रजगतः पुरतः सर्वदा उद्घाटिता स्यात्। अत इयम् ई-पत्रिका आरब्धा। अत एव एषा दीपशिखा अन्वर्थनाम्नी। प्रखरपण्डितप्रज्ञाब्रध्नमयूखेभ्यो वञ्चिता अनया दीपशिखया उपक्रियन्तामिति।

एषा पत्रिका प्रख्यातानां विदुषाम् अधीयानानां छात्राणाम् अन्येषां च कृते मुक्ता वर्तते। यः कश्चन संस्कृतभाषया अत्र लेखं प्रकाशयितुम् अर्हति। पत्रिकया शास्त्रस्य प्रचाराय अस्माभिः विविधा विषया अत्र उपनिभत्स्यते। सम्प्रति इयं पत्रिका त्रैमासिकी भवति। त्रिषु मासेषु अस्याः पत्रिकायाः नवीनान् अङ्कान् पाठकाः अन्तर्जाले एकेन नोदनेन पठितुं शक्ष्यन्ति। अयम् अस्याः प्रथमः अङ्कः सरस्वतीविषयकः भवति।

अस्मिन् अङ्के हरेकृष्णपट्टजोशिमहोदयस्य सुललितं सरस्वतीस्तुतिपरं काव्यं, वेदपुराणादिषु प्रथितं सरस्वत्याः स्वरूपं प्रतिपादयन् वेङ्कटरमणभट्टकृतः प्रबन्धः च विदुषाम् अपि तोषम् आवक्ष्यन्ति इति अस्माकं विश्वासः। अस्माकं विश्वविद्यालयस्य सरस्वतीपूजाया वृत्तान्तः विष्णुपदपालस्य लेखे सम्यग् विवृतः। कृष्णगोपालपात्रस्य लेखः अपि कालिदासीयकाव्यप्रतिभायाः कञ्चन विशिष्टम् अंशं सामान्यानां संस्कृते विशिष्टप्रवेशरहितानाम् अपि सुबोधतया प्रकटयति। अस्मिन् अङ्के अद्वैतशास्त्रस्य, मीमांसाशास्त्रस्य च परिचयात्मकौ लेखौ स्तः यौ अग्रे अनुवर्तिष्यमाणौ सम्पूर्णस्य अद्वैतशास्त्रस्य, मीमांसाशास्त्रस्य च परिचयम् अशास्त्रज्ञानां कृते समाकलयिष्यतः। एवम् अग्रे अस्माभिः अन्ये अपि शास्त्रीयाः सामान्याः च विषयाः पत्रिकायां प्रकाशयिष्यन्ते। पाठकानां प्रतिस्पन्दः अस्माकं स्फूर्तिजनकः भविष्यति।

अस्य अङ्कस्य चित्राणि तथागतमण्डलेन अस्मद्विभागीयेन च्छात्रेण स्वीकृतानि। प्रच्छदे दीपशिखायां या सरस्वती लसति सा शुभदीपपालस्य कृतिः। अन्तिमे च पुटे आगामिनं होलिकोत्सवं चित्रितवान् शुभदीप एव।

एतदवसरे नामानि अनुच्चार्य एव तान् सर्वान् साधुवादैर्भूषयामः ये अस्मिन् कर्मणि साह्यमाचरन्। भगवतः श्रीरामकृष्णस्य चरणयोः अस्याः पत्रिकायाः साफल्यं प्रार्थयामहे।

# ब्राह्मी वेदयताद्ब्रह्म विद्यां प्रददती पराम्

ड. हरेकृष्णपट्टजोशी

यामन्तरेण जगतोऽखिललोकयात्रा
नो वै चलत्यतितरां तमसि प्रविष्टा।
वागीश्वरीं भगवतः परमां च शक्तिं
तां चिन्तयामि सततं परमार्थसिद्ध्यै। १।

त्वद्दिव्यरूपममलं कविभिर्यदुक्तं
कुन्देन्दुशुभ्रमिति संस्खलितैर्वचोभिः।
तत्ते प्रियं भवति मातुरिवार्भकस्य
यत्ते गता भुवि पुरा महतीं प्रतिष्ठाम्॥ २।

शुभ्राम्बरेण लसितं सितगात्रमेत-
न्मातर्यदुक्तमिति तन्नितरां मनोज्ञम्।
ये ते समर्चनरता खलु ते यशोभी
राजन्ति सन्ततमहो कवयः सुशुभ्रैः॥ ३।

वीणाविनिर्गतवचो मुनयो निशम्य
यस्या विधूतशमलाः समवाप्तकामाः।
ब्रह्मामृतं ह्यनुभवन्ति मुदा समाधौ
तत् संस्फुरत्वतितरां हृदये मदीये॥ ४।

हंसासने विलसितं तव पादपद्मं
भक्त्या सदा परमया खलु ये स्मरन्ति।
आदाय सारमिह ते परिहाय हेयं
विष्णोस्तदेव परमं पदमाविशन्ति॥ ५।



# सरस्वतीपरिचयः

विद्वान् ड. वेङ्कटरमणभट्टः

इह शिष्टानुशिष्टानां शिष्टानामपि सर्वदा।
वाचामेव प्रसादेन लोकयात्रा प्रवर्तते॥

इति दण्डिनो वचनं वाचो गरिमाणं वर्णयति। अस्मत्सनातनसंस्कृतौ सरस्वती वागीश्वरीत्वेन वागभिन्नत्वेन च उपश्लोक्यते। अतः शब्दमाहात्म्यं नाम स्वरस्वतीमाहात्म्ये पर्यवस्यति। सरस्वत्याः महिमानं न कोऽपि प्रत्याख्यातुमीष्टे पशुभ्यो मनुष्यस्य भेदे वाक्तत्त्वस्य महत्त्वात्। ज्ञानं हि तत्र प्रधानं कारणम्। अतो मानवजीवने ज्ञानपारम्यं दुरपलपम्। ज्ञानाधिदेवता हि सरस्वती यदधीनं ज्ञानप्रकाशनम्। ततः

इदम् अन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्येत॥

इति काव्यादर्शकारभणितौ सरस्वतीमहिमा साकल्येन प्रथते। तदिदानीं सरस्वतीविषये किञ्चिद् ग्रश्नीमः।

## विषयः

सरस्वती नाम विद्यार्थिनां विदुषां च परमश्रद्धेया देवता या वेद-शास्त्रादिपाठोपक्रमे–

प्र णो देवी सरस्वती वाजेभिर्वाजिनीवति।
धीनामवित्र्यवतु।

इत्यादिमन्त्रैः या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता इत्यादिश्लोकैः च अभिष्टूयते विद्यासम्पत्तिमर्थवद्भिः। सा ब्रह्मणा समजनि तेनैव च पत्नीत्वेन पर्यग्राहि इति श्रूयते पुराणकथाविस्तरे। तदुक्तं ब्रह्मवैवर्ते–

आविर्बभूव तत्पश्चात् मुखतः परमात्मनः।
एका देवी शुक्लवर्णा वीणापुस्तकधारिणी॥
कोटिपूर्णेन्दुशोभाढ्या शरत्पङ्कजलोचना।
वह्निशुद्धांशुकाधाना प्रिया पत्नी प्रजापतेः॥
संस्मिता सुदती वामा सुन्दरीणां च सुन्दरी।
श्रेष्ठा श्रुतीनां शास्त्राणां विदुषां जननी परा॥
वागधिष्ठातृदेवी सा कवीनामिष्टदेवता।
शुद्धसत्त्वस्वरूपा च शान्तरूपा सरस्वती॥ [ब्रह्मखण्डे ५२, ५३, ५४,५५] इति।

सेयं ब्रह्मभार्येति प्रसिद्धावपि, नारायणस्य पत्नी, लक्ष्मीसपत्नी इति श्रूयते ब्रह्मवैवर्तपुराणे प्रकृतिखण्डे। क्वचिद् ब्रह्मणो मुखाज् जातेति। क्वचिच्च ब्रह्मणो यज्ञकुण्डाज्जातेति उपलभ्यते। ब्रह्मणा आराध्यमानाद् भरतनामकाद् यज्ञाग्नेः जाता इत्यतः भारती इत्यपि आख्या तस्याः प्रसिध्यति। ब्रह्मणो जाता इत्यतो ब्राह्मीति प्रथमानायाः तस्याः कालान्तरे नदीरूपमापन्नायाः सरस्वती इति अभिधानं जागर्ति सरो नीरमिति कथनात् तद्वती इत्यर्थानुसन्धानात्। अस्याः पुत्रः काव्यपुरुष इति काव्यमीमांसायां राजशेखरः अवदत्। तान्त्रिकास्तु आदिशक्तेः महामायायाः किञ्चन रूपं ब्रह्मपत्नीलक्षणं सरस्वतीत्याहुः। यदन्ववदन् शङ्करभगवत्पादाः–

गिरामाहुर्देवीं द्रुहिणगृहिणीमागमविदः इति।

## सरस्वत्याः भौतिकं रूपम्

सरस्वत्याः भौतिकं रूपं तु या कुन्देदुतुषारहारधवला इत्यादिभिः नैकैः श्लोकैः प्रसिद्धमेव विद्यते। शुभ्रवर्णा, वीणां पुस्तकं स्फाटिकमालां च बिभ्रती, हंसवाहना च विराजते भारती। अत्र सरस्वत्याः शुभ्रवर्णः तस्याः सात्त्विकतां निरूपयति। वीणापाणित्वं तस्याः सङ्गीतकाव्यादिकलाधिपत्यं व्यञ्जयति। पुस्तकं च वेदशास्त्रादिज्ञानसम्राज्ञीत्वं, वेदवाङ्मयस्य सृष्टिकर्मसर्वस्वत्वं, वाचः व्यवहारपरमसाधानत्वं च सङ्केतयति। एतदुपोद्बलकमाह भगवान् व्यासो भागवते–

प्रचोदिता येन पुरा सरस्वती वितन्वता–
जस्य सतीं स्मृतिं हृदि। इति।

नारायणनाभिनलिनादुदितो ब्रह्मा नष्टचेष्टः तस्थौ तदा नारायणः तस्य हृदये सृष्टिकर्मबोधं चिकीर्षन् सरस्वतीं वेदलक्षणां प्रचोदयामास इत्ययं प्राकरणिकवृत्तान्तः।

## सरस्वत्याः शब्दरूपत्वम्

इदं हि परिपश्यामो यद् वाग् वाणीप्रभृतयो वचनवाचिनः शब्दाः दृश्यन्ते सरस्वतीवाचित्वेनापि। ततः प्रतीयते यद् वाक्-

सरस्वत्योः अभेदो वर्तते इति।

ननु शब्दः आकाशगुणः इति पठन्ति आगमविदः, तत्कथं शब्दो रूपं सरस्वत्याः भवेदिति स्यादाशङ्का कस्यचित्।

तत्रेदानीं प्रसादयामः–

चत्वारि वाक् परिमिता पदानि
तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति
तुरीयं वाचो मनुष्या वदन्ति॥

इत्ययं वाग्भेदवादी मन्त्रो भवति वाग्देवीसूक्ते। निगमागमज्ञा वदन्ति यत् परा पश्यन्ती मध्यमा वैखरी चेति चत्वारो वाक्प्रकाराः। तत्र आदिमं प्रकारत्रयं गुहायां भवति, मनोहृदयाद्यन्तर्विषयकमिति यावत्। तुरीयो वैखरीलक्षणो वाक्प्रकारः कण्ठताल्वादिभिरभिव्यङ्ग्या मानवभाषा इति। एवञ्च सर्वविधा वाक् सरस्वत्या एव रूपमिति विज्ञायते। तथैव, वागभिमानिनी देवता सरस्वतीति प्रसिद्धिः या खलु अशेषं वाङ्मयम् अहम् इति मन्यते शब्दात्मकशरीरे आभिमानिकतादात्म्यात् पार्थिवशरीरे अस्मदादिवत्।

अखण्डं चैतन्यं परा वाग् इति संज्ञितम्। विषयोपधातः अखण्डं चैतन्यं वैषयिकज्ञानात्मना अवभासते यस्य अर्थः इति व्यपदेशः। सोऽर्थः शब्दाभिव्यङ्ग्यः। अथवा अखण्डज्ञानात्मकं चैतन्यं मनोबुद्ध्याद्युपाधिवशाद् विवक्षाविषयीभूतार्थत्वेन सत् शब्दाकारेण मुखाद् निस्सरति। गामानय इत्यत्र गौः इति पदार्थो गृह्यते। गां पठ इत्यत्र च गोशब्दं पठ इत्यनुसन्धानात् शब्दो गृह्यते। अर्थाद् अर्थतः शब्दग्रहणं शब्दतः अर्थग्रहणमिति तयोरभेदो निरणायि आगमज्ञैः। एतेन विद्यास्वरूपिण्याः सरस्वत्याः शब्दस्वरूपमपि स्वरससिद्धमिति स्पष्टम्।

## उपसंहारः

विद्याधिदेवी वागधिष्ठात्री सरस्वती सर्वेषां ज्ञानलिप्सूनां परमोपास्या भवति। ध्यानयोगी अपि ॐकाररूपवागनुसन्धिनी लभतेतरामात्मज्ञानं चेत् वाचः उपास्यत्वमाहात्म्यस्य विस्तरेणालम्। सरस्वतीपूजावसरे तु बालानामक्षराभ्यासारम्भः प्रसिद्ध एव भारते। शरन्नवरात्रावसरे सरस्वती पूजा प्रवर्तते दक्षिणदेशेषु। अतो विजयादशमी विद्यादशमीत्यपि आख्यायते। शास्त्रज्ञानकवित्वादिलाभाय सरस्वत्युपासना आगमेषु पठ्यते। क्षेमेन्द्रः कवित्वादिलाभाय सरस्वत्युपासनाक्रमं कविकण्ठाभरणे निरूपयामास। जप-ध्यान-वेदशास्त्राभ्यासयोग्यो ब्राह्ममुहूर्तः सारस्वतमुहूर्तः इति व्यपदिष्टः आलङ्कारिकैः। एवं सरस्वत्या महिमा पारे वाचाम्। अन्ते मल्लिनाथनिबद्धं सञ्जीवनीटीकामङ्गलमुच्चार्य विरम्यते–

शरणं करवाणि शर्मदं ते
चरणं वाणि चराचरोपजीव्यम्।
करुणामसृणैः कटाक्षपातैः
कुरु मामम्ब कृतार्थसार्थवाहम्॥




अस्मद्विश्वविद्यालये देव्या नीराजनम्

# रामकृष्णमिशन्-विवेकानन्दविश्वविद्यालये सरस्वतीपूजा

विष्णुपदपालः

या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना।
या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैः सदा वन्दिता
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा॥

हिन्दुसम्प्रदाये ज्ञानस्य सङ्गीतकलायाश्च अधिष्ठात्री देवी सरस्वती। सर्वत्र क्षेत्रे अस्माभिः देवाः स्तूयन्ते इत्ययमेव हिन्दुसम्प्रदायः। भारतस्य गृहे गृहे इयं पूजा भवत्येव। यद्यपि इयं पूजा प्रतिदिनं भवति तथापि वङ्गेषु महासरस्वतीदेव्याः विशिष्टतया आराधना माघमासस्य शुक्लपक्षस्य पञ्चम्यां तिथौ क्रियते। प्राचीनकाले बहवः कवयः पण्डिताश्च सरस्वतीमातुः आराधनां कृत्वैव विशिष्टविद्यां प्राप्य सहृदयानां हृदये चिराय स्थानमलभन्त। एवमेव बहवः सङ्गीतज्ञा अपि देव्या आराधनां विधायैव विशिष्टकलां प्राप्य यशसा गीतजगति विराजन्ते। सरस्वत्याः नामान्तरं भवति वाणी, ब्राह्मी, वाग् इति। देवीयं सत्त्वगुणा वर्तते। अत एव ज्ञानस्य कलायाः इत्यादीनां देवी।

आदिशक्ते रूपत्रयमस्ति। महालक्ष्मीः, महाकाली, महासरस्वती चेति। देवीभागवतानुसारेण आदिशक्तेः तृतीयांशतः सरस्वतीदेव्याः जन्म। एवञ्च सा देवी भगवतः कृष्णस्य जिह्वात उत्पन्ना। महाकालीदेव्याः पूजा चैत्रे अश्विने वा मासे शुक्लपक्षस्य नवम्यां तिथौ क्रियते। महालक्ष्मीदेव्याः पूजा कार्तिकमासस्य अमावस्यातिथौ क्रियते। एवञ्च महासरस्वतीदेव्याः पूजा माघमासस्य शुक्लपक्षस्य पञ्चम्यां तिथौ भवति। अद्वैतिनां मोक्षः एव परमप्राप्तिः। तत्रापि ज्ञानेनैव मुक्तिः इति तु सर्वजनविदितमेव। ज्ञानाभावाज् जगदिदमन्धकारमयं स्यात्।

एतादृशमाहात्म्यविशिष्टज्ञानस्य अधिष्ठात्री देवी सरस्वती माता। अतः तस्याः पूजाया अपि माहात्म्यम् अतुलनीयमस्ति। प्रथमतया ब्रह्मा सरस्वतीं पूजयामास। पुनश्च जगति तत्पूजायाः प्रचारः कृष्णेनैव कृतः। विद्यालये, विश्वविद्यालये, गृहे गृहे सर्वत्र प्रायः देव्याः पूजा भवत्येव।

बाल्यकालतः छात्राः विद्याप्राप्तये आनन्दलाभाय च वरिष्ठानां सकाशात् किञ्चिद् धनं स्वीकृत्य लघुमण्डपे पूजा प्रारभ्यन्ते। एवञ्च तद्दिने सर्वत्र मातुः आराधनायां रताः मानवाः। शिक्षाप्रतिष्ठानादिषु शिक्षकादिभिः समं छात्राः पूजामायोजयन्ति। पुनश्च तद्दिने सर्वकारीयविराममाप्य दैवकार्ये सम्पूर्णमात्मानं नियोजयति। प्रायः लघवः शिशवः एकमासात्प्राक् एव पूजार्थं सन्निग्धाः भवन्ति। ग्रामादिषु बालाः स्वमातुः शाटिकया ज्ञानदेव्या वासगृहं निर्मान्ति। पूजादिवसात् प्राक्तनदिने प्रतिमानयनं, मण्डपसज्जा, फलादिक्रयणम् इत्यादीनि पूजासम्बन्धिकार्याणि क्रियन्ते। अत्रापि प्रायः बालाः रात्रिकाले निद्रातः उत्थाय पुष्पाणि सङ्गृह्णन्ति। प्रातः काले शैत्यवशात् स्नातुमनिच्छन्तोऽपि ज्ञानप्राप्त्याशया विधिवत् कार्यं कुर्वन्ति। ततः परं निर्मलवस्त्रं परिधाय शुद्धमनसा पूजामण्डपं यान्ति। ततः पर प्रेम्णा भक्त्या सश्रद्धया च वाग्देव्याः ज्ञानदायिन्याः सकाशे पुष्पाञ्जलिः प्रदीयते।

सरस्वती महाभागे विद्ये कमललोचने
विश्वरुपे विशालाक्षि विद्यां देहि नमोस्तु ते।
जय जय देवि चराचरसारे कुचयुगशोभितमुक्ताहारे
वीणारञ्जितपुस्तकहस्ते भगवति भारति देवि नमोस्तु ते॥ इति

एतन्मन्त्रेण ज्ञानदायिनीं ज्ञानं प्रार्थयन्ते जनाः। एतत्पवित्रदिने पितृतर्पणमपि प्रदीयते। अस्मिन् दिने लघुबालानां अक्षरारम्भः कार्यते। नववस्त्रसज्जिताः बालाः देव्याः पुरस्तात् प्रस्तरपट्टे प्रथमम् अक्षरं लिखन्ति इति प्रायः सर्वत्र पूजामण्डपेषु एतादृशं चित्रं दरीदृश्यते एव।

अस्मद्विश्वविद्यालये विशुद्धसिद्धान्तपञ्जिकानुसारेण पूजातिथिः निर्धार्यते। अस्माकं विश्वविद्यालयस्य छात्रावासे स्थितानां छात्राणां कृते कार्यसूची प्रदीयते। केषाञ्चित् भाजनक्षालनं , केषाञ्चित् फलशोधनं ,केषाञ्चित् मूर्त्यानयनं, केषाञ्चित् पुष्पसञ्चयनम् इत्यादीनि कार्याणि भवन्ति। ततः परं सर्वे छात्राः धौतवस्त्रं परिधाय पूजामण्डपे उपस्थिताः भवन्ति। ततः परं पूजाकार्यं प्रारभ्यते।

अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरं शुचिः॥ इति

मन्त्रेण पूजामारभ्य क्रमशः पुण्यहवाचनं, स्वस्तिवाचनं, साक्ष्यमन्त्रः, सङ्कल्पः, पञ्चगव्यशोधनं , वेदिशोधनम् , घटस्थापनं , द्वारदेवतापूजा, भूतापसारणम् इत्यादीनि कार्याणि विधिवत् क्रमानुसारेण आचर्यते। ततः परं श्रीगुरुपूजा, श्रीगणेशपूजा, शिवपूजा, सूर्यपूजा, नारायणपूजा इत्यादिपूजाः क्रियन्ते सरस्वतीपूजायाः प्राक् एव। सरस्वतीदेव्याः आवाहनमन्त्रो भवति तावत्–

भद्रकाल्यै नमो नित्यं सरस्वत्यै नमो नमः।
वेदवेदान्तवेदाङ्गविद्यास्थानेभ्य एव च॥ इति

अन्ते सर्वे पुष्पाञ्जलिं प्रदाय अतिथिभ्यः प्रसादादिकं ददति स्वयं च मातुः प्रसादं सेवन्ते।

ततः परस्मिन् दिने प्रतिमाविसर्जनाय गङ्गां प्रति यान्ति। ततः मण्डपमागत्य देव्याः भजनं कुर्वन्ति। प्रतिमां विसृज्य एव आगामिनि वत्सरे भविष्यमाणपूजार्थमपेक्षा प्रारभ्यते।

नमः सरस्वत्यै नमः



अस्मद्विश्वविद्यालये पूज्यमाना देवीप्रतिमा

# कालिदासवर्णितवियोगे मानवेतराणां सहानुभूतिः

कृष्णगोपालपात्रः

वाग्देवतावतारस्य महाकविकालिदासस्य रचनासु दृश्यते विविधदिग्गामिनी प्रतिभा। तद्रचनासु प्रकृतिचित्रणं तु सर्वासु दिक्षु परिलक्ष्यते। दीपशिखाकाव्येषु हि प्रकृतिः कदाचित् स्वस्वरूपेण क्वचिद् विभावादिरूपेण क्वचित् प्रतीकरूपेण कदाचिच्च चेतनसत्तारूपेण चित्रिता।

सम्भोगशृङ्गारापेक्षया विप्रलम्भशृङ्गारस्य परा काष्ठा लक्ष्यते तत्र तत्र कालिदासीयकाव्येषु। तथाहि

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायाम्
आत्मानं ते चरणपतितं यावदिच्छामि कर्तुम्।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः॥ (मेघदूते उत्तरमेघे ४२)

शङ्करस्य तृतीयनेत्रस्थेनाग्निना भस्मीभूतस्य कामदेवस्य शरीरं दृष्ट्वा दृश्यते रतेः विलापः।

शशिना सह याति कौमुदी सह मेघेन तडित्प्रलीयते।
प्रमदाः पतिवर्त्मगा इति प्रतिपन्नं हि विचेतनैरपि॥ (कुमारसम्भवे ४/३३)

कालिदासवर्णितविप्रलम्भे जडा प्रकृतिरपि इत्थं संवेदनशीला प्रदर्शिता यत् सापि मनुष्यवत् सुखदुःखयुक्ता इति भाति। अर्थात् सेयम् अचेतना प्रकृतिरपि मनुष्यवत् स्वव्यापारं प्रदर्शयति। यथा मेघस्य संयोगेन रामगिरिः स्नेहव्यक्तिः भवति।

मेघो हि अचेतनः तथापि स मनुष्यवत् यक्षस्य विरहम् अवगम्य यक्षप्रेरितसन्देशान् यक्षप्रियां प्रति प्रापयेदिति मत्वा मेघं प्रत्याह यक्षः–

सन्तप्तानां त्वमसि शरणं तत् पयोद प्रियायाः
सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य।
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां
बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या॥ (मेघदूते पूर्वमेघे ७)इति।

अचेतनस्य मेघस्यापि प्रियाविरहेण विरहितं यक्षं प्रति सहानुभूतिः स्यादेव इति विचिन्त्य मेघं स्वसन्देशान् यक्षप्रियां प्रापयितुम् अनुरुन्धे यक्षः।

सन्देशप्रेरकः वार्तावाहकः दूतो वा सामान्यतया मनुष्यो भवति तदितरः प्राणी वा। परन्तु इह मेघदूते कालिदासेन प्रदर्शितं यद् मनुष्येतरः अचेतनः मेघः अपि वार्ताप्रेरणे समर्थः।

यक्षस्तु प्रियाविरहाद् एवं विवेकरहितः सञ्जातः यत् कल्पनादृष्टां प्रियाम् आलिङ्गितुम् आकाशे हस्तौ प्रसारयति परन्तु क्षणेनैव हस्तौ प्रियारहितौ इति ज्ञात्वा भृशं दुःखितो भवति। यक्षस्य इमाम् अवस्थां वीक्ष्य वनस्थलीदेवता अपि मुक्तास्थूलानश्रुबिन्दून् पातयन्ति–

ममाकाशप्रणिहितभुजं निर्दयाश्लेषहेतो-
र्लब्धायास्ते कथमपि मया स्वप्नसन्दर्शनेषु।
पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां
मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः पतन्ति॥ (मेघदूते उत्तरमेघे ४३)

प्रियाविरहेण पीडितस्य यक्षस्य कातरस्वरं मर्मीकृत्य लोकोपकारतत्परः मेघश्रेष्ठः यक्षोक्तायाः यक्षप्रियायाः प्राणान् पातुं लोकोत्तरवाण्या पूर्वोक्तं यक्षसंदेशं यक्षप्रियां जगाद।

एवं प्रत्यक्षतया दृश्यते मेघदूते वियोगस्य बलवती वेदना।

मदने भस्मीभूते सति मदनसुहृत् चन्द्रः आत्मनः उदयमेव निष्फलं मन्यते। नवचूतकुसुमानां मदनकृतवाणत्वं न सिद्ध्यति। कोकिला अपि मधुरस्वरं त्यक्तवन्तः। किञ्चालिपङ्क्तिः या मदनेन गुणकृत्ये नियोजिता सा अधुना कारुणिकस्वरैः रतिमेवानुकरोति–

अलिपङ्क्तिरनेकशस्त्वया गुणकृत्ये धनुषो नियोजिता।
विरुतैः करुणस्वनैरियं गुरुशोकामनुरोदितीव माम्॥ (कुमारसम्भवे ४/१५)

इत्येवं प्रकारेण कालिदासेन रतिविलापप्रसङ्गे पशुपक्षिणामवस्था रतिमुखेन वर्णिता।

इन्दुमतीशोकविह्वलः महाराजः अजः अपि इन्दुमतीप्रयाणे शोकातुराणां वृक्षादीनां वास्तविकस्वरूपं निर्वर्णयति। तथाहि यः अशोकवृक्ष इन्दुमत्या पद्भ्यां स्पृष्टः अधुना पुष्परूपाश्रूणि विमोचयति–

अमुना कुसुमाश्रुवर्षिणा त्वमशोकेन सुगात्रि शोच्यसे॥ (रघुवंशे ८/६३)

विलपन्तम् अजं दृष्ट्वा वृक्षादयोऽपि रसरूपाश्रूणि विमोचयन्ति-

विलपन्निति कोसलाधिपः करुणार्थग्रथितं प्रियां प्रति।

अकरोत् पृथिवीरुहानपि स्रुतशाखारसबाष्पदूषितान्॥ (रघुवंशे ८/७०)

एवं हि दृश्यते शोकविह्वलस्य अजस्य करुणविलापेन अरण्यप्रदेशोऽपि शोकस्तब्धः सञ्जातः।

ज्येष्ठादेशाद् अत्याज्यामपि सीतां यदा लक्ष्मणः परित्यजति तदा पुरस्तात् स्थिता जह्नोर्दुहिता तरङ्गरूपहस्तमुत्थाप्य सीतापरित्यागं वारयति।

अवार्यतेवोत्थितवीचिहस्तैर्जह्नोर्दुहित्रा स्थितया पुरस्तात्॥ (रघुवंशे १४/५१)

सीतापरित्यागात् समदुःखिनो मयूराः नृत्यं त्यक्तवन्तः, वृक्षाः कुसुमानि परित्यक्तवन्तः, मृगास्तु भक्षणयोग्यान्यपि तृणानि मुखाद् अपसारयामासुः।

नृत्यं मयूराः कुसुमानि वृक्षा दर्भानुपात्तान्विजहुर्हरिण्यः।
तस्याः प्रपन्ने समदुःखभावमत्यन्तमासीद् रुदितं वनेऽपि॥ (रघुवंशे १४/६९)

अभिज्ञानशाकुन्तलेऽपि दृश्यते प्रकृत्या सह शकुन्तलायाः तादात्म्यानुभूतिः। वनस्पतिसेवां सा 'आज्ञा गुरूणां ह्यविचारणीया' इति दृष्ट्या न करोति। अपि तु भ्रातृस्नेहेनैव करोति। स्पष्टीकरोति सा एव 'न केवलं तातनियोगः, अस्ति मे सहोदरस्नेहः' इति । वनस्पतिमृगादिषु यथा तस्याः स्नेहः तेषामपि शकुन्तलां प्रति सहानुभूतिरासीत्। वनस्पतयः शकुन्तलापतिगृहगमनवेलायां तस्यै वस्त्राभूषणं प्रददति। पक्षिणः लताश्च तस्या अभिनन्दनम् अकुर्वन्। शकुन्तलाविरहे शोकमग्ना हि आश्रमवृक्षाः प्राणिनश्च। तथापि सा आश्रमतरुभिः वनवासबन्धुभिः अनुमतेति तातः कण्वः शकुन्तलाम् अकथयत्-

अनुमतगमना शकुन्तला तरुभिरियं वनवासबन्धुभिः।
परभृतविरुतं कलं यतः प्रतिवचनीकृतमेभिरात्मनः॥ (शाकुन्तले ४/१३)

शकुन्तला पतिगृहगमनकाले आश्रमविरहकातरा भवति तस्मिन् काले प्रियंवदा तां ब्रूते सखि न केवलं त्वमेव दुःखिता अपि तु त्वद्वियोगेन आश्रमस्थाः प्राणिनो अपि कातराः इति। तथाहि

उद्गीर्णदर्भकवला मृगी परित्यक्तनर्तना मयूरी।
अपसृतपाण्डुपत्राणि मुञ्चन्त्यश्रु इव लताः॥ (शाकुन्तले ४/१४)

शकुन्तलाविरहेण शकुन्तलामनुसरन् मृगशावकः पतिगृहं प्रतिष्ठमानायाः शकुन्तलायाः मार्गं न जहाति-

यस्य त्वया व्रणविरोपणमिङ्गुदीनां
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे।
श्यामाकमुष्टिपरिवर्धितको जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते॥ (शाकुन्तले ४/१६)

एवं वियोगवर्णने हि दृश्यते कालिदासीयकाव्ये विशिष्टता। तत्काव्यनाटकादिषु विद्यमानानि पात्राणि तु वियोगं प्रकटयन्त्येव तदितरे अचेतनप्रकृतिप्राणिवृक्षलतादयोऽपि स्वानुभवं स्फुरयन्ति। नायकवियोगाद् नायिकायाः नायिकावियागाद्वा नायकस्य चेतः दुःखपीडितं भवतीति तु सामान्यमेव। परन्तु नायकनायिकावियोगात् सुहृद्वियोगाद्वा मनुष्येभ्य इतरेषामपि मनः दुःखितं भवतीति काचित् अभिनववर्णनरीतिः दृश्यते ततो ज्ञायते तस्मिन्नपि कोणे लब्धप्रवेशः कालिदासः।



(चित्रं तथागतमण्डलेन स्वीकृतम्)

# अद्वैतशास्त्रपरिचयः

अमितकुमारदे

कस्त्वं कोऽहं कुत आयातः, कुत आजाता कुत इयं विसृष्टिः इत्यादिप्रश्नानां उत्तरानुसन्धानरतैः भारतीयाखिलदार्शनिकैः जगज्जीवबन्धमोक्षादिविषये यथाप्रतिभं स्वस्वमतानि प्रोक्तानि। अतः भारतीयदर्शनशास्त्राकाशे नक्षत्राणि इव बहूनि दर्शनानि विद्यन्ते। दार्शनिकेषु ये वेदप्रामाण्यम् ईश्वरस्य अस्तित्वं च अङ्गीकुर्वन्ति, ते आस्तिकाः तेषां दर्शनम् आस्तिकदर्शनम् पुनश्च, ये वेदप्रामाण्यम् ईश्वरस्य अस्तित्वं च नाङ्गीकुर्वन्ति ते नास्तिकाः, तेषां दर्शनं नास्तिकदर्शनम्। संस्कृतवाङ्मये षडास्तिकदर्शनं नास्तिकदर्शनत्रयं च प्रसिद्धम्। क्रमानुसारं सर्वेषां दर्शनानां परिचयं कारयिष्यामः दीपशिखाया पुटेषु वयम् इति सङ्कल्पः। वेदान्तस्य परिचयः- दर्शनेषु वेदान्तदर्शनं भारतीयाध्यात्मशास्त्रस्य चरमो विकासः। वेदस्यान्तः सिद्धान्तो वेति विशिष्टार्थे वेदान्तशब्दस्य प्रयोगः। अन्तपदेन सारभागः इत्यर्थः बोद्धव्यः, यतो हि वेदस्य सारभूतांशः वेदान्ते वर्णितमस्ति। यथोक्तं-

> निःश्वासभूता मे विष्णोर्वेदा जाताः सुविस्तराः।
> तिलेषु तैलवद्वेदे वेदान्त सुप्रतिष्ठितः॥

वेदान्तस्य परिचयार्थं सदानन्दयोगीन्द्रेण वेदान्तसारे उक्तं- "वेदान्तो नाम उपनिषत्प्रमाणं तदुपकारिणी शारीरकसूत्रादीनि च।" मुख्यतया उपनिषदेव वेदान्तत्वेन गृह्यन्ते सर्ववेदान्तिभिः। उपनिषत्प्रतिपादितश्रुतिरेव वेदान्तस्य चरमप्रमाणम्। वेदान्तशास्त्रे प्रसिद्धं प्रस्थानत्रयं- श्रुति-स्मृति-सूत्रप्रस्थानं चेति। तत्र श्रुतिप्रस्थानत्वेन उपनिषदः, स्मृतिप्रस्थानत्वेन श्रीमद्भगवद्गीतायाः किञ्च, सूत्रप्रस्थानत्वेन शारीरकसूत्रस्य ब्रह्मसूत्रस्य वा प्रसिद्धिः।

वेदान्तिभिः स्वानुभवानुसारं स्वप्रतिभानुसारं वा उपनिषत्प्रतिपादिततत्त्वं बहुधा प्रपञ्चितम्। ब्रह्मणः नित्यत्वे सत्यत्वे पारमार्थिकत्वे यद्यपि नास्ति कस्यापि भिन्नमतिः किन्तु जीवस्य ईश्वरस्य जगतः वा स्वरूपविषये वेदान्तिनां मतपार्थक्यं दृश्यते। तस्मात् वेदान्तशास्त्रेऽपि सिद्धान्तभेदाद् भवति मतभेदः।

| नाम | सिद्धान्तः |
|---|---|
| शङ्कराचार्यः | अद्वैतम् |
| भास्करः | भेदाभेदः |
| रामानुजः | विशिष्टाद्वैतम् |
| मध्वः | द्वैतम् |
| निम्बार्कः | द्वैताद्वैतम् |
| श्रीकण्ठः | शैवविशिष्टाद्वैतम् |
| वल्लभः | शुद्धाद्वैतम् |
| रामानन्दः | रामानन्दीयम् (विशिष्टाद्वैतस्य प्रकारः) |
| बलदेवः | अचिन्त्यभेदाभेदः |

एवमन्येऽपि केचन अर्वाचीनाः सम्प्रदाया अपि प्रसिध्यन्ति। सम्प्रति वयम् अद्वैतवेदान्तस्य चर्चां प्रसारयामः। अद्वैतवेदान्तदर्शनानुसारं "सर्वं खल्विदं ब्रह्म", "ब्रह्म सत्यं जगन्मिथ्या, जीवो ब्रह्मैव नापरः"। तत्र वयं क्रमशः अद्वैतमते ब्रह्म-जीव-जगदादीनां पदार्थानां स्वरूपं पश्यामः।

## ब्रह्म

अस्ति अस्मिन् जगति निर्विकल्पोपाधिरहिता निर्विकारा एका सत्ता या ब्रह्म इत्युच्यते। "बृहत्त्वाद् बृंहणत्वाद्वा आत्मैव ब्रह्मेति गीयते"। श्रुतौ हि अस्ति ब्रह्मणः सगुणनिर्गुणरूपयोरुभयोः पर्याप्तविवेचनम्। शङ्कराचार्यस्य मते सगुणं ब्रह्म मायासंवलितं व्यावहारिकम् उपास्यं जगत्कारणं चेति, किन्तु निर्गुणं ब्रह्म पारमार्थिकं विद्यते। निर्गुणब्रह्मविषये उपनिषदि आम्नातम्-

> अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत् (कठोपनिषत्-१।३।१५)।
> यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति।
> तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥

"सत्यं ज्ञानमनन्तं ब्रह्म" इति ब्रह्मणः स्वरूपलक्षणम्। सच्चिदानन्दं हि ब्रह्मणः यथार्थस्वरूपम्। इदमेव ब्रह्म मायासंवृतं सत् सगुणं ब्रह्म इत्यभिधीयते। तदेव जगत्कारणमपि भवति। सृष्टिव्यापारस्तस्य लीलामात्रम्। सर्वकामस्य सर्वज्ञस्य ब्रह्मणः सृष्टिविधौ न किमपि प्रयोजनमस्ति। तत्रेश्वरो जगत्कारणमिति न्यायविद आमनन्ति। अद्वैतवेदान्ते तु ब्रह्मैव जगतः

उपादाननिमित्तोभयकारणमिति सिद्धम्।

तत्र ब्रह्ममीमांसायामस्ति शङ्कररामानुजयोर्वैमत्यम्। तथाहि ब्रह्म सजातीयविजातीयस्वगतभेदशून्यमिति शङ्करः, सजातीय-विजातीयभेदरहितोऽपि ईश्वरो न स्वगतभेदरहित इति रामानुजो मन्यते।

मोक्षं प्रति कारणं ब्रह्मज्ञानमेव। तथैवोक्तं शङ्करेण-

ब्रह्माभिन्नत्वविज्ञानं भवमोक्षस्य कारणम्।
येनाद्वितीयमानन्दं ब्रह्म सम्पद्यते बुधैः॥

अनुवर्तिष्यते...



# मीमांसाशास्त्रपरिचयः

श्रीमन्तभद्रः

पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश॥ (याज्ञवल्क्यस्मृतिः- १.३)

इति स्मरणेन चतुर्दशसु विद्यास्थानेषु मीमांसा अन्यतमा इति विज्ञायते। तस्य मीमांसाशब्दस्य व्युत्पत्तिरित्थमस्ति– मान् पूजायामिति धातोः 'मानेर्जिज्ञासायाम्' इति वार्तिकेन सनि प्रत्यये द्वित्वे इत्त्वे 'मान्वधदान्शान्भ्यो दीर्घश्चाभ्यासस्य' (अष्टाध्यायी ३.१.६) इति सूत्रेण अभ्यासस्य दीर्घे 'अ प्रत्ययात्' (अष्टाध्यायी ३.३.१०२) इति सूत्रेण अप्रत्यये 'अजाद्यतष्टाप्' (अष्टाध्यायी ४.१.४) इति सूत्रेण टापि प्रक्रियया 'मीमांसा' इति शब्दो निष्पद्यते। अस्य मीमांसाशब्दस्य संज्ञारूपेण क्रियारूपेण च वेदे प्रयोगो बहुशो दरीदृश्यते– 'सैषा आनन्दस्य मीमांसा भवति' (तैत्तिरीयोपनिषद् १.८.१), 'उत्सृज्याँ नोत्सृज्यामिति मीमांसन्ते ब्रह्मवादिन इत्याहुः उत्सृज्यामेवेति' (तैत्तिरीयसंहिता ७.५.७.१), 'ब्राह्मणं पात्रे न मीमांसेत' (ताण्ड्यमहाब्राह्मणम् ६.५.९) इति। एतासां श्रुतीनां पर्यालोचनेन मीमांसापदस्य विचारपरकत्वं बुध्यते। ततश्च पूजार्थकात् मान्धातोः निष्पन्नत्वात् पूजितविचारो मीमांसापदार्थ इति लभ्यते। तद्भणितं भामत्यां वाचस्पतिमिश्रेण– 'पूजितविचारवचनो हि मीमांसाशब्दः'[1] इति। विचारपूर्वकतत्त्वनिर्णयो मीमांसाशब्दार्थः इति न्यायकोशः। तादर्थ्यात् तच्छब्दप्रयोगः इति रीत्या मीमांसाशब्दः तत्प्रतिपादके मीमांसाशास्त्रेऽपि वर्तते। यद्यपि पुरा मीमांसापदेन कर्मकाण्डज्ञानकाण्डयोः उभयोर्ग्रहणं भवति स्म, परन्तु गच्छता कालेन मीमांसापदेन कर्मकाण्डात्मिकायाः पूर्वमीमांसाया एव ग्रहणं भवति न तु ज्ञानकाण्डात्मिकाया उत्तरमीमांसाया इति बोध्यम्। 'स्वाध्यायोऽध्येतव्यः', 'यजेत स्वर्गकामः', 'न कलञ्जं भक्षयेत्', 'नेक्षेतोद्यन्तमादित्यम्' इति अपूर्वविधानप्रतिषेधाभ्यां शासनाद् मीमांसा शास्त्रपदवीं लभते। जीवस्वरूपभोगापवर्गानां शासनात् मीमांसा शास्त्रपदवीम् अर्थात् दर्शनपदवीमारोहति। मीमांसा व्याकरणेन प्रतिपादितं प्रकृतिप्रत्ययविभागं समाश्रित्य वाक्यार्थं विचारयति। अतो मीमांसाशास्त्रं वाक्यशास्त्रमित्यपि उद्यते। अखिलकर्मकाण्डीयश्रुत्यर्थस्य तात्पर्यनिर्णायकं फलप्रद-देवताप्रतीकोपासनावेदकं वेदव्यासकृपाप्राप्तदिव्यदृष्टिमता मीमांसकप्रमुखेन जैमिनिनानुशिष्टमिदं मीमांसाशास्त्रम्। तस्य सिद्धान्तपोषकाणां प्रेक्षावच्चेतस्सन्तोषकाणां मीमांसकप्रवराणां जैमिनिमुखानामाचार्याणां परिचयः क्रमेण प्रदास्यते।

अनुवर्तिष्यते…

[1]भामती, पृष्ठम् ४६

